# संस्कृतवार्ता:

दिनाङ्क : 05/11/2025 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- बिहारराज्ये विधानसभानिर्वाचनस्य प्रथमचरणाय मतदानं श्वः भविष्यति।
- अद्य प्रातः उत्तरप्रदेशस्य मिर्जापुरस्य चुनार-रेल-स्थानके षट् तीर्थयात्रिणां काल्का-हावडा-मेल-रेल-यान-दुर्घटनायां मृत्यु: अभवत्।
- विदेशमन्त्री डा. एस. जयशङ्करः अद्य अवदत् यत् भारत-जपान-देशयोः सहभागित्वेन भारत-प्रशान्तक्षेत्रीय सामरिकस्थिरतां वर्धयति।
- गुरुनानकदेवस्य जन्मजयन्त्यावसरे 'गुरुपूरब' इत्युत्सव: देव दीपावली पर्व: च आराष्ट्रे आसंसारे च सश्रद्धया भक्तिभावनया च परिपाल्यते।

---

<u>बिहार-निर्वाचनम्</u>

बिहारराज्ये विधानसभानिर्वाचनस्य प्रथमचरणाय मतदानं श्वः अष्टादश-मण्डलेषु एकविंशत्यधिकैकशत निर्वाचनक्षेत्रेषु मतदानं भविष्यति। स्वतन्त्रं, निष्पक्षं, शान्तियुतं च मतदानं निश्चेतुं विस्तृतसुरक्षाव्यवस्था कृता अस्ति। पटना, वैशाली, नालन्दा, भोजपुर, मुङ्गेर, सारण, सिवान, गोपालगञ्ज, मुज़फ़्फ़रपुर इत्यादीनां अष्टादश-मण्डलानां विधानसभाक्षेत्रेषु मतदानं श्वः भविष्यति। मतदानप्रक्रिया निरीक्षणार्थं सर्वेषु एकचत्वारिंशोत्तर-त्रिशताधिक-पञ्चचत्वारिंशत्-सहस्र-मतदानकेन्द्रेभ्यः वेबकास्टिङ्ग् भविष्यति। सर्वेषु मतदानकेन्द्रेषु राज्य-आरक्षकैः सह केन्द्रीय-सशस्त्र-अर्धसैनिक-बलानि अपि नियुक्तानि सन्ति। महिला-शक्तिकरणं प्रवर्धयितुं षड्विंशत्यधिक-नवशतं यावत् महिला-नियंत्रित-मतदान-केन्द्राणि, सप्तोत्तरैकशतं यावत् दिव्यांग-कार्मिक-नियंत्रित-मतदान-केन्द्राणि च स्थापितानि सन्ति। मतदानं प्रातः सप्त-वादनादारभ्य सायं षड्वादन पर्यन्तं भविष्यति। तत्रैव सुरक्षायाः कारणात् सिमरी, बख्तियारपुर, महिषि, तारापुर, मुङ्गेर, जमालपुर, सूर्यगढ़ा विधानसभाक्षेत्राणां षड्पञ्चशत

मतदानकेन्द्रेषु च मतदानसमयः पञ्चवादनं यावत् अस्ति। एन. डी. ए. घटबन्धने , जे. डी. (यू) सर्वाधिकेषु सप्तपञ्चाशत् आसनेषु, तदनन्तरं भाजपेतिदलं अष्टचत्वारिंशत् आसनेषु , एल. जे. पी. दलं चतुर्दश आसनेषु, तथा राष्ट्रिय-लोक-मोर्चा दलं च द्वयोः आसनयोः कृते स्पर्धिष्यति। महाघटबन्धने आर. जे. डी.-दलं सर्वाधिकेषु त्रिसप्तति आसनेषु, तदनन्तरं प्रथमे चरणे काङ्ग्रेस्-दलस्य चतुर्विंशति प्रत्याशिनः, सि. पि. आई. (एम. एल.) दलस्य चतुर्दश सदस्याः नैर्वाचनिक-समराङ्गणे सन्ति। बिहारविधानसभानिर्वाचनस्य प्रथमे चरणे, उपमुख्यमन्त्रिणः सम्राट् चौधरी इत्यस्य, विजयकुमारसिन्हायाः सहैव प्रमुखानां राजनैतिकजनानां राजनैतिक-भविष्यस्य निर्णयः भविष्यति। अस्मिन् चरणे राज्यसर्वकारस्य प्राय: षोडश मन्त्रिणां राजनैतिक-भागस्य निर्णयोपि भविष्यति।

----------------------------------------

उत्तरप्रदेश दुर्घटना

अद्य प्रातः उत्तरप्रदेशस्य मिर्जापुरस्य चुनार-रेल-स्थानके षट् तीर्थयात्रिणां काल्का-हावडा-मेल-रेल-यान-दुर्घटनायां मृत्यु: अभवत्। मण्डलाधिकारिणा पवनकुमार-गङ्गवारेन उक्तं यत् कार्तिकपूर्णिमायाः पवित्र-स्नानार्थं तीर्थयात्रिणः वहन्ती गोमोह-प्रयागराज-बरवाडीह इति रेलयानं सोनभद्रतः प्रातः सपादनव-वादने प्लेटफार्म-सङ्ख्या-चत्वारि इत्यत्र आगतम् इति। मुख्यमन्त्री योगी आदित्यनाथः, केन्द्रीयमन्त्री तथा स्थानीयसांसदः अनुप्रिया पटेलः च घटनायां शोकं प्रकटितवन्तौ,जनपदस्य अधिकारिभ्यः तत्क्षणमेव तत्र गन्तुं, साहाय्योद्धार कार्यं तीव्रं कर्तुं, व्रणितानां समुचितचिकित्सां सुनिश्चेतुं च निर्देशं प्रदत्तवती।

----------------------------------------

विदेशमन्त्री/भारत-जपान

विदेशमन्त्री डा. एस. जयशङ्करः अद्य अवदत् यत् भारत-जपान-देशयोः सहभागित्वेन भारत-प्रशान्तक्षेत्रीय सामरिकस्थिरतां वर्धयति। नवदिल्ल्यां अष्टमं भारत-जपान-हिन्द-प्रशान्त-मञ्चं सम्बोधयन्, डा. जयशङ्करः अवदत् यत् भारत-जपान-सहभागित्वेन शक्तेः लाभं,

आपूर्तिशृङ्खलायाः सुदृढीकरण, कृत्रिम-बुद्धिः, सेमिकण्डक्टर्स इति अर्धचालक यन्त्रं, महत्वपूर्ण खनिज, स्वच्छ-ऊर्जा, अन्तरिक्षं च इत्येतेषु निवेशेषु ध्यानं केंद्रितं भवेत् इति।

---------------------------------------

## गुरुनानाक:

गुरुनानकदेवस्य जन्मजयन्त्यावसरे 'गुरुपूरब' इत्युत्सव: आराष्ट्रे आसंसारे च सश्रद्धया भक्तिभावनया च परिपाल्यते। गुरुनानकवर्य: सिक्खपन्थस्य स्थापक: अस्ति। प्रकाशोत्सव: गुरुपूरब: वा सिक्खसमुदायीजनानां कृते महत्वपूर्णतम: दिवस: भवति। एष: वर्ष: गुरूनानक देव वर्यस्य षड्पंचापशदुत्तरपंचशततम: जन्मोत्सव: अस्ति। दिवसोऽयं कार्तिकपूर्णिमाया: अपि अस्ति, देशस्य विभिन्नेषु भागेषु अस्यापि धार्मिकं महत्वं वर्तते, जनाश्च गंगादिषु पवित्रासु नदीषु अद्य स्नानं कुर्वन्ति। इदं दिनं चित्रकूट-वाराणस्यादिषु देवदीपावलित्वेन अपि परिपाल्यते। राष्ट्रपति: द्रौपदीमुर्मु: प्रधानमन्त्री नरेन्द्रमोदी च देवदीपावलि: प्रकाशोत्सवस्य च अवसरे सर्वेभ्य: देशवासिभ्य: शुभकामना: प्रदत्तवन्तौ।

---------------------------------------

## रिजिजू-राहुल

भाजपेति दलस्य वरिष्ठः नेता तथा केन्द्रीयमन्त्री किरेन रिजिजूवर्यः, काङ्ग्रेस्-दलस्य नेत्रा राहुलेन कृत भाजपा-निर्वाचन-आयोगयोः उपरि मतचौर्यस्य आरोपस्य विषये निन्दाम् अकरोत्। अद्य नवदिल्ल्यां वार्ताहरान् सम्बोधयन् श्री रिजिजुः, उक्तवान् यत् यदा परिणामः काङ्ग्रेस्-दलस्य पक्षे नागच्छति तदा राहुलः निर्वाचन-आयोगं तथा ई. वी. एम. इत्युभौ आरोपयति।

सः अवदत् यत्, मतदातृ-सूच्यां कस्यापि त्रुटि विषये काङ्ग्रेस्-दलं निर्वाचनायोगं प्रति परिवादं कर्तव्यम् ।

---------------------------------------

## पियूष-न्यूजीलैण्ड्

वाणिज्य-उद्योग-मन्त्री पियूष् गोयलः अद्य आक्लैण्ड्-नगरे भारत-न्यूजीलैण्ड्- देशयोः वाणिज्य-मञ्चे स्वस्य न्यूजीलैण्ड्-देशस्य समकक्षीयेण टॉड मैक्ले इत्यनेन सह मिलितवान्। सभायां श्री गोयलः उभयोः राष्ट्रयोः मध्ये समुद्रीयम्, रक्षा, शिक्षा, क्रीडा, पर्यटनम् इत्यादीनां सहकारस्य क्षेत्राणां विषये अवधानं दत्तवान्। श्रीगोयलः न्यूज़ीलैण्ड्-देशस्य प्रधानमन्त्रिणा क्रिस्टोफर् लक्सन् इत्यनेन, श्रीमैक्ले इत्यनेन च सह भारतीयप्रवासिनः अपि सम्बोधितवान्। प्रवासिनः सम्बोधयन् सः अवदत् यत्, सर्वकारः करस्य भारम् न्यूनीकृत्य, व्यापारस्य सुगमतां प्रवर्धयितुं कार्यं कुर्वन् अस्ति। सः अवदत् यत्, भारतं आकर्षकं गन्तव्यं कर्तुं प्रयत्नाः कृताः सन्ति।

---------------------------------------

## फिलिपीन्स्- चक्रवात

फिलिपीन्स-देशे न्यूनातिन्यूनं षट्षष्ठि जनाः मृताः, लक्षशः जनाः स्वगृहात् पलायिताः, अस्य वर्षस्य चक्रवातेषु एकः प्रबलः चक्रवातः देशे प्रावर्तत। स्थानीयतया टीनो इति नाम्ना ख्यातः कल्मेगी-चक्रवातः ह्यः प्रातःकाले भूम्यां प्राप्य दुर्बलः अभवत्, परञ्च त्रिंशोत्तरैकशत कि. मी. प्रतिहोरायाः वेगेन वायुः प्रवहति। देशस्य राष्ट्रिय-आपत्-सङ्कट-न्यूनीकरण-तथा-प्रबन्धन-परिषदा अनुमन्यत यत् सूचितानां मृतेषु ऊनपञ्चाशत् जनाः सेबू-प्रदेशे आसन्, तेषु अधिकांशजनाः वर्षायाः कारणात्, पतितानां भग्नावशेषैः, भूस्खलनेन, जलप्लावनेन च प्रभविताः।

।। इति वार्ता ।।